कान्तः -न्ता -न्तं, प्रियतमः -मा -मं, इष्टतमः -मा -मं; 'a dear friend,' प्रियसुहृद् *m.*; 'dear as one's life,' असुसमः -मा -मं, प्राणाधिकः -का -कं, प्राणैर् गरीयान् -यसी -यः (स्).—(Of high price, costly) दुर्मूल्यः -ल्या -ल्यं, बहुमूल्यः -ल्या -ल्यं, महामूल्यः -ल्या -ल्यं, महार्घः -र्घा -र्घं, दुष्क्रेयः -या -यं, बहुधनव्ययेन क्रेयः -या -यं, गुरुः -र्वी -रु, महार्हः -र्हा -र्हं, अर्घ्यः -र्घ्या -र्घ्यं, उत्कृष्टः -ष्टा -ष्टं,

DEAR, *s.* (Word of endearment) प्रियः -या, दयितः -ता, कान्तः -न्ता, दयितः -ता, वत्सः -त्सा; 'my dear,' प्रिय voc. c. *m.*, प्रिये voc. c. *f.*

DEAR, *adv.* (Oh dear!) अहो, अहोवत, कष्टं, आ, हा, हन्त, अहह.

DEAR-BOUGHT, *a.* दुष्क्रीतः -ता -तं, बहुमूल्येन क्रीतः -ता -तं.

DEARLY, *adv.* (With great fondness) प्रियं, सुप्रियं, प्रीत्या, सुप्रीत्या; 'dearly beloved,' अतिप्रियः -या -यं, प्रियतमः -मा -मं. —(At a high price) बहुमूल्येन, दुर्मूल्येन, महार्घेण, गुरु, गुरुमूल्येन.

DEARNESS, *s.* (Fondness) प्रियता, इष्टता, अभीष्टता, प्रीतिः *f.*—(High price) दुर्मूल्यं, बहुमूल्यं, माहार्घ्यं, महार्घता, महार्घः, मूल्यगुरुता, गुरुत्वं.

DEARTH, *s.* (Famine) दुर्भिक्षं, दुष्कालः, अनाकालं, दुर्भिक्ष्यं, नीवाकः, प्रयामः, उपद्रवः; 'dearth of provisions,' आहारविरहः.—(Want, need) अभावः, अप्राप्तिः *f.*, विरहः, असम्भवः, दौर्लभ्यं, वैरल्यं; 'dearth of money,' धनाभावः.

To DEARTICULATE, *v. a.* विसन्धीकृ, सन्धित्रोटनं कृ, व्यङ्गीकृ.

DEARTICULATED, *p. p.* विसन्धितः -ता -तं, त्रुटितसन्धिः -न्धिः -न्धि.

DEATH, *s.* मृत्युः *m.*, मरणं, निधनं, पञ्चत्वं -त्ता, अत्ययः, अन्तः, अन्तकालः, अन्तकः, अपगमः, नाशः, विनाशः, प्रलयः, संस्थानं, संस्थितिः *f.*, अवसानं, निःसरणं, उपरतिः *f.*, अपायः, प्रयाणं, जीवनत्यागः, तनुत्यागः, जीवोत्सर्गः, देहक्षयः, प्राणवियोगः, मृतं, मृतिः *f.*, मरिमा *m.* (न्), महानिद्रा, दीर्घानिद्रा, कालः, कालधर्म्मः, कालदण्डः, कालान्तकः, नरान्तकः, दिष्टान्तः, व्यापद *f.*, हान्द्रं, कथाशेषता, कीर्त्तिशेषः, लोकान्तरप्राप्तिः *f.*—(Murder) वधः, घातः, मारणं.—(Death personified) यमः, कालः, कृतान्तः; 'a violent death,' अपघातः, अपमृत्युः *m.*; 'death by lightning,' वज्रवधः; 'deserving of death,' वध्यः -ध्या -ध्यं, वधार्हः -र्हा -र्हं or प्रयाणार्हः; 'desire for death,' मुमूर्षा; 'desirous of death,' मुमूर्षुः -र्षुः -र्षु; 'at the point of death,' आसन्नमृत्युः, मुमूर्षुः, मृतप्रायः, मृतकल्पः; 'fearing death,' विवशः -शा -शं, अरिष्टदुष्टधीः -धीः -धि; 'put to death,' हतः -ता -तं, व्यापादितः -ता -तं, मारितः -ता -तं; 'to put to death,' हन् (c. 2. हन्ति -न्तुं), प्राणदण्डं कृ; 'angel of death,' यमदूतः; 'death-drum,' वध्यडिण्डिमः; 'hour of death,' मृत्युकालः, प्रयाणकालः; 'voluntary death by fasting,' प्रायः -यणं; 'after death,' प्रेत्य.

DEATH-BED, *s.* मृत्युशय्या, मरणशय्या, मृत्युशयनं, मुमूर्षुशयनं.

DEATHFUL, *a.* मारात्मकः -का -कं, आत्ययिकः -की -कं, मृत्युमयः -यी -यं, मृत्युजनकः -का -कं, प्राणान्तकः -का -कं, अन्तकरः -री -रं, घातुकः -का -कं.

DEATHLESS, *a.* अमरः -री -रं, मृत्युवर्ज्जितः -ता -तं, अमरणीयः -या -यं, अमर्त्यः -र्त्या -र्त्यं, अनन्तः -न्ता -न्तं, निरपायः -या -यं, अनश्वरः -रा -रं.

DEATH-LIKE, *a.* मृत्युसदृशः -शी -शं or कालसदृशः, कालकल्पः -ल्पा -ल्पं.

DEATH'S-DOOR, *s.* मृत्युद्वारं, यमद्वारं, यमालयद्वारं, यमपुरद्वारं.

DEATH'S-HEAD, *s.* शवशिरः *n.* (स्), मृतशरीरमस्तकः, कुणपमस्तकः, कपालः, नृकपालः.

DEATH'S MAN, *s.* वध्यपुरुषः, घातुकपुरुषः, वधकर्म्माधिकारी *m.* (न्), दण्डपाशिकः, मृतपाः *m.* (पा), घातकजनः.

DEATH-WATCH, *s.* मरणसूचकशब्दकारी कीटविशेषः.

To DEAURATE, *v. a.* रस् (c. 10. रसयति -यितुं), सुवर्णे (nom. सुवर्णयति -यितुं).

DEAURATE, *a.* रसितः -ता -तं, सुवर्णान्वितः -ता -तं, सुवर्णवद्धः -द्धा -द्धं.

To DEBAR, *v. a.* बाध् (c. 1. बाधते -धितुं), निरस् (c. 4. -अस्यति -असितुं), निराकृ, अपाकृ, बहिष्कृ, वृज् in caus. (वर्ज्जयति -यितुं), निषिध् (c. 1. -षेधति -षेद्धुं), वृ in caus. (वारयति -यितुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं); 'is debarred,' परिहीयते.

DEBARRED, *p. p.* निषिद्धः -द्धा -द्धं, प्रतिषिद्धः -द्धा -द्धं, बाधितः -ता -तं, निवारितः -ता -तं, विघ्नितः -ता -तं, नुन्नः -न्ना -न्नं.

To DEBARK, *v. a.* उत्तृ (c. 1. -तरति -रितुं -रीतुं), प्रत्युत्तृ; नौकाया अवरुह् (c. 1. -रोहति -रोढुं) or अवतृ.

DEBARKATION, *s.* उत्तरणं, प्रत्युत्तरणं, नौकाया अवतरणं or अवरोहणं.

To DEBASE, *v. a.* अपकृष् (c. 1. -कर्षति -क्रष्टुं), स्वपदात् पत् in caus. (पातयति -यितुं) or भंश् in caus. (भंशयति -यितुं) or अपध्वंस् in caus. (-ध्वंसयति -यितुं) or च्यु in caus. (-च्यावयति -यितुं), अवसद् in caus. (-सादयति -यितुं), न्यूनीकृ, अधःकृ, कन (nom. कनयति -यितुं). —(Make despicable) अवमानास्पदं कृ, खलीकृ, लघूकृ, तुच्छीकृ.

DEBASED, *p. p.* अपकृष्टः -ष्टा -ष्टं, स्थानभ्रष्टः -ष्टा -ष्टं, पातितः -ता -तं, अधःपातितः -ता -तं, पदच्युतः -ता -तं, अपध्वस्तः -स्ता -स्तं, अवज्ञोपहतः -ता -तं, भग्नदर्पः -र्पा -र्पं.

DEBASEMENT, *s.* (Act of) अपकर्षः -र्षणं, पातनं, पदभंशनं, अपध्वंसः, अभिभवः, अवमानना, लघूकरणं, खलीकरणं.—(State of) अपकृष्टता, निकृष्टता, पतितत्वं, पातित्यं, अपमानभावः, न्यूनीभावः, अधोगतिः *f.*, अधोभावः, भ्रष्टता, वृषलत्वं.

DEBATABLE, *s.* विवदनीयः -या -यं, विचार्य्यः -र्य्या -र्य्यं, वितर्क्यः -र्क्या -र्क्यं, विचारणीयः -या -यं, सन्दिग्धः -ग्धा -ग्धं.

DEBATE, *s.* विवादः, वादानुवादः, वादप्रतिवादः, संवादः, विसंवादः, वादः, हेतुवादः, वादयुद्धं, विचारः, विरोधोक्तिः *f.* वाग्युद्धं, वाक्कलहः, विप्रलापः, विप्रतिपत्तिः *f.*, वितण्डा, वितर्कः, तर्कः, वाक्यविरोधः, वाक्यं, सन्देहः, वाक्कलिः *m.*—(Contest) कलहः, विग्रहः, विरोधः, कलिः *m.*; 'matter of debate,' विवादास्पदं.

To DEBATE, *v. a.* and *n.* विवद् (c. 1. -वदति -ते -दितुं), विसंवद्; विचर् in caus. (-चारयति -यितुं), विवादास्पदीकृ, वादानुवादं कृ, वितर्क् (c. 10. -तर्कयति -यितुं), विप्रलप् (c. 1. -लपति -पितुं), वितण्ड् (c. 1. -तण्डते -ण्डितुं), कलह (nom. कलहायते), वैर (nom. वैरायते), वाक्कलहं कृ, मथ् (c. 1. मथति -थितुं).

DEBATED, *p. p.* विचारितः -ता -तं, वादग्रस्तः -स्ता -स्तं, मथितः -ता -तं.

DEBATEFUL, *a.* विवादी -दिनी -दि (न्), विवादशीलः -ला -लं, विवादार्थी -र्थिनी -र्थि (न्), कलहकारी -रिणी -रि (न्), वाक्कलहप्रियः -या -यं, वाग्युद्धप्रियः -या -यं, वाक्कलिप्रियः -या -यं, सङ्घन्द्वः -न्द्वा -न्द्वं, विरोधी -धिनी -धि (न्).

DEBATER, *s.* विवादी *m.* (न्), विचारकः, विवादकृत्, तर्की *m.* (न्), वादी *m.* (न्), हेतुवादी, वितण्डाकारी *m.* (न्), न्यायी *m.* (न्), सांवादिकः.

To DEBAUCH, *v. a.* दुष् in caus. (दूषयति -यितुं), सन्दुष्, प्रतिदुष्, दुष्टीकृ; भ्रष्टीकृ, क्षतीकृ; नश् in caus. (नाशयति -यितुं); सद्व्यसनं -नां -नं कृ; धर्म्मभ्रष्टं -ष्टां -ष्टं कृ, धर्म्मविप्लुतं -तां -तं कृ, विकृ; 'to debauch a maiden,' कन्यां दुष् or धृष् in caus. (धर्षयति -यितुं), सतीत्वभ्रष्टां कृ.

DEBAUCH, *s.* मदावेशः, कामावेशः, व्यसनावेशः, सपीतिः *f.*, सम्पीतिः *f.*, सम्भोजनं, केलिः *m. f.*, स्त्रीमद्यादिसम्भोगार्थम् उत्सवः.

DEBAUCHED, *p. p.* दूषितः -ता -तं, दुष्टः -ष्टा -ष्टं; 'woman,' दूषिता, क्षतयोनिः.

DEBAUCHEE, *s.* व्यसनी *m.* (न्), व्यसनीयः, लम्पटः, विषयी *m.* (न्), सम्भोगी *m.* (न्), विषयासक्तः, विषयानुरागी *m.* (न्), कामासक्तः,